श्री रामसखे कृत धाम क्षेत्र प्रारम्भ

ब्रह्म सम्प्रदा गोलोक देश अयोध्या धाम सरजू क्षेत्र रत्नागिरि परिक्रमा वनप्रमोद सुखविलास सोमवट बैठक नृत्यराघवध्यान क्रीटमुकुटदर्शन नूपुर सेवा रसिक गादी ब्रह्मा आचार्य्य हनूमान् उसीला सखाभेष चारुशीला श्रीमध्वाचार्य्य हनुमत् अवतार मत अभेद खण्डन उदार द्वैत मत धनुर्बाण मुद्रा राम तारकमन्त्र गुरु श्रीवसिष्ठजी रघुनाथगोत्र श्रीसीताराम इष्ट इति श्री रामसखे विरचितं धामक्षेत्रं समाप्तं ।

दोहा—माध्वभाष्य निजद्वैतमत, मिलनद्वार हनुमान् ।
रामसखे विधिसम्प्रदा, उड़पी गुरुस्थान ।।इति।।

यजुर्वेदे कल्पवल्लीशाखायां तिलकपरत्वं नासामूलमारभ्य केशपर्य्यंतं ऊर्ध्वपुंड्रं विधाय तन्मध्येहरिद्रासारसम्भवं बिन्दुं यो धारयति स परं प्रियो भवति स भ्रूणहत्यां तरति स ब्रह्महत्यां तरति स मुक्तिभागी भवति इति पञ्चरात्रे ॥ नामचिन्हादिना देहे वन्हिना वा मृदांकनं । सा दीक्षा प्रोच्यते बाह्या ह्यज्ञानां ज्ञानिनामपि ॥१॥ मुद्रांकिताङ्ग-सम्पर्कात्तुलसीमालधारिणः ॥ ऊर्द्धपुन्ड्रेन चिन्हेन वैष्णवाः संप्रकीर्तिताः ॥२॥ अथ धनुर्बाणपरत्वमाह ॥ अगस्त्य-संहितायां ॥ शीतलाच्छतगुणं प्रोक्तं तप्तं च परिधार्यते । अङ्किताः सर्वकालेषु चतुर्वर्णाश्रमादयः ॥३॥ येषु होमेषु श्राद्धेषु न कोपि धनुषांकितः ॥ तस्य पिंडाहुतिर्यान्ति निष्फलत्वं न संशयः ॥४॥ यो वै नित्यं धनुर्वाणांकितो भवति स पाप्मानं तरति स भगवदाश्रितो भवति स भगवद्रूपो भवति इत्यथर्वणः श्रुति ॥ श्रीमन्महारामायणे ॥ चक्रात्फलं शतगुणं धनुषः शरस्य यञ्चांकितोपि स च रामजनाग्रगण्यः ॥ सारूप्यमेव लभते किलतत्क्षणे वै राम-प्रियः प्रियतरोनुदिनं च मह्यं ॥५॥ वामे करे च धनुषाथ सरेण सव्ये पञ्चांकितोपि मनुजो नरलोकधन्यः ॥ तस्मै नमन्ति शिरसा द्रुहिणादिदेवास्तद्दर्शनेन मनुजा किल कल्मषघ्नाः ॥६॥ भाले च रम्यतिलकं विविरेखदीप्तं

रामांघ्रिबिन्दुसहितं स च पीतमध्ये। कण्ठे तथा तुलसिदाम-
लसत् भुजे वै तप्तेण बाणधनुषांकितरामभक्तः ॥७॥
ब्रह्मरामायणे ॥ राममुद्रानेत्रमूले किरीटं भालपट्टके
वक्षस्थले चन्द्रिकां च मुद्रिकां हृदये निषेत्। धनुर्बाणादिकं
चैव बाहुमूलशुभावहं सख्यभावप्रयुक्तानां सीतालीभाव-
भावुकाम् ॥८॥ अगस्त्यसंहितायां ॥ ललाटे धारयेदूर्द्धव्पुण्ड्रं
परमशोभनम् ॥ हरिद्राबिन्दुसंयुक्तमश्वमेधफलं लभेत् ॥९॥
युग्ममुद्रा सदा धार्य्या फलोर्द्ध युगलं शरम् ॥ फलोर्द्धंव्दर्शना-
द्विप्रं ब्रह्महत्यां व्यपोहति ॥१०॥ तुलसीपत्रमात्रेण योर्चये-
द्राममन्वहं॥ स याति शाश्वतं ब्रह्मन्पुनरावृत्तिदुर्लभम् ॥११॥
नीलोत्पलसहस्त्रेण त्रिसन्ध्यं योर्चयेद्धरिं ॥ फलं वर्षसहस्त्रेण
तदीयेनैकलभ्यते ॥१२॥ श्रीमहाशम्भुसंहितायां महाविष्णु-
वाक्यं ॥ रामचन्द्रान्महाशम्भुर्लब्धवान् मन्त्रमुत्तमम् ॥
स्वप्रकाश्यं सदाबोध्यं वृजिनार्णवतारकं ॥१३॥ पुरुषार्थप्रदं
शश्वद्धत्याकोटि निवारणं ॥ ज्ञानदीपं कलारूढ़ं सर्वविद्या-
फलप्रदम् ॥१४॥ वशिष्ठसंहितायां ॥ सर्वे वर्णाश्रमस्थाश्च
नार्य्यस्थापितथेतराः ॥ चांडाला चान्त्यजाश्चान्ये पशवः
पापयोनयः ॥१५॥ धनुर्वाणाङ्कमात्रेण मुक्ता प्रकृतिमंडलात् ॥
दिव्यदेहाः परंधाम श्रीरामस्य व्रजंति हि ॥१६॥
ब्रह्माण्डपुराणे मालापरत्वम् ॥ तुलसी मोहनी विष्णो-

र्वशीकरणमूलिका तस्या धारणमात्रेण प्रीणाति भगवान्हरिः ॥१७॥ शिवसंहितायां ॥ तुलसीकाष्ठमाला-भिर्भूषितः पुण्यमाचरेत् ॥ पितृणां देवतानां च पुण्यं कोटिगुणं भवेत् ॥१८॥ रामनामांकितं लोकं तुलसीमाल-भूषितं दृष्ट्वा निन्दापरो यस्तु स वध्यो मतु वैष्णवः ॥ कण्ठलग्ना तु या माला सा कण्ठीति प्रकीर्तिता। तस्या धारणमावश्यं कर्तव्यं युग्ममेवहि ॥१९॥ यज्ञोपवीतबद्धार्य्या कंण्ठे तुलसिमालिका ॥ नाशौचं धारणे तस्या यतः सा ब्रह्मरूपिणी ॥२०॥ शयने भोजने चैव पुरीषोत्सर्गनेपिच ॥ न त्यजेत्तुलसीमालां त्यजेच्च ब्रह्महा भवेत् ॥२१॥ पञ्चरात्रे ॥ राममंत्रं समादाय मन्त्रमन्यं यदीच्छति महादुखार्दितो गत्वा रौरवं नरकं भजेत् ॥२२॥ ज्ञानार्णवे ॥ गुरौ मनुष्यबुद्धिं च मन्त्रे चाक्षरभावनाम् ॥ प्रतिमायां शिलाबुद्धिं कुर्वाणो नरकं व्रजेत् ॥२३॥ अगस्त्यसंहितायां ॥ तुलसीदललग्नंतु प्रसादान्यं हरेर्नरः यो भक्षयति राजेन्द्र वाँछितं लभते फलं ॥२४॥ श्रुतिः ॥ ययेतत्तारकं ब्राह्मणो नित्यमधीयते सपाप्मानं तरति स मृत्युं तरति स भ्रूणहत्यां तरति स सर्वहत्यां तरति स संसारं स सर्वं तरति स विमुक्ताश्रितो भवति सोऽमृतत्वंच गच्छति सोमृत्वंच गच्छतीति ॥ श्रुतिः॥ अथाह भारद्वाजो याज्ञवल्क्यं सहोवाच श्रीरामचन्द्रमंत्रस्य माहात्म्यं नो ब्रूहि भगवन्निति सहोवाच

याज्ञवल्क्यः स्वः प्रकाशः परंज्योतिस्वभूत्यैकचिन्मयस्तदेव-
रामचन्द्रमन्त्रस्य मनुराद्यक्षरस्मृतः ॥ अखण्डैकरसानन्द-
स्तारकब्रह्मसंज्ञकः ॥ रामायेति स विज्ञेयः सत्यानन्द-
श्चिदात्मकः ॥ नमः पदं स विज्ञेयः पूर्णानन्दैकविग्रहः ॥
सदा नमन्ति हृदये सर्वे देवा मुमुक्षवः ॥ इति य एवं
मन्त्रराजं श्रीरामचन्द्रस्य नित्यमधीते सोग्निना पूतो भवति
सवा ॥ पुनः स आदित्येन स सोमेन स ब्रह्मणा स विष्णुना
स रुद्रेण पूतो भवति स सर्वैर्देवैर्ज्ञातो भवति तेनेतिहास-
पुराणानां शतसहस्त्राणि जप्तानि भवन्ति श्रीरामचन्द्रमन्त्रस्य
स्मरतो गायत्र्याः शतसहस्त्राणि जप्तानि भवन्ति प्रणवा-
नामयुतकोटिजप्तानि भवन्ति दश पूर्वान्दशा परान्पुनाति
स्वयं क्रियावान्भवति स महान्यवतीति ॥२६॥ सर्वैश्वर्य्यप्रदं
नृणां सर्वकामफलप्रदम् ॥ एतमेव परं मन्त्रं ब्रह्मरुद्रादि-
देवताः ॥२७॥ ऋषयश्च महात्मानो मुक्ता जप्त्वा भवांबुधौ ॥
इमं मन्त्रमगस्त्यश्च जप्त्वा रुद्रत्वमाप्नुयात् ॥२८॥ ब्रह्मत्वं
कश्यपो जप्त्वा कौशिकस्त्वमरेशताम् ॥ कार्तिकेयो मनुश्चैव
इन्द्रार्कगिरिनारदाः ॥२९॥ बालखिल्यादिमुनयो देवतात्वं
प्रपेदिरे ॥ इममेव जपन्मन्त्रं रुद्रस्त्रिपुरहारकः ॥३०॥
ब्रह्महत्याविनिर्मुक्तः पूज्यमानो भवेत्सुरैः ॥ अद्यापि रुद्रः
काश्यां तु सर्वेषां त्यक्तजीविनां ॥३१॥ दिशत्येतं महामन्त्रं
तारकं ब्रह्मनामकं तस्य श्रवणमात्रेण सर्व एव दिवं

गताः ॥३२॥ ब्रह्मरामायणे ॥ नासिकामूलमारभ्य ललाटांतं मनोहरं ॥ रामपादाकृतिं सौम्यं पीतबिन्दुं सुवर्तुलं ॥३३॥ यत्प्रमोद वने रम्ये रत्नाद्रितटभूमिषु ॥ पीतपांडुरकंरम्यं रजस्तद्धारयंस्तनौ ॥३४॥ वशीकुर्य्याद्धरिं-भक्ता यो वहेत्तद्वनंरज ॥ पवित्रं सहजानन्दं श्रीचारुचरणां-कितम् ॥३५॥ सहजप्रेमदं सर्वकामदं सुसुमङ्गलम् ॥ ममापि सा प्रियाधूलिस्तद् बिन्दुं मूर्ध्नि धारयेत् ॥३६॥ अगस्त्यसंहितायां ॥ साधिकांगुलांतरालमधिकं तूत्तरोत्तरं ॥ ब्रीहिमात्रं पृथू पास्यौ चतुरंगुललंबकौ ॥३७॥ सरलं रेखकं द्वदं समं निर्मल्यनिर्मितम् ॥ हरिद्रासारासम्भूतम् बिन्दु सर्वसुखावहं ॥३८॥ नासिकाकेशपर्य्यंतमूर्द्धव्पुण्ड्रं सुशोभनं ॥ मध्ये चूर्णं हरिद्राया धारयेद्वैष्णवोत्तमः ॥३९॥ ऊर्द्ध पुण्ड्र स्यमध्येतु दिव्यचूर्णं तु धारयन् ॥ श्रीकरं विजयं पुण्यं सर्वपापप्रणाशनम् ॥४०॥ पाद्मे ॥ नामप्रसादमाहात्म्यं प्रभावं मज्जनस्य च ॥ मत्तोधिकतरं सर्वं नाहं वेद्मि कुतो जनाः ॥४१॥ ब्रह्मयामले ॥ ये ये प्रयोगास्तन्त्रेषु तैस्तैर्यत्साध्यते फलम ॥ तत्सर्वं सिध्यति क्षिप्रं रामनामैक-कीर्तनात् ॥४२॥ अनन्तसंहितायां ॥ रामनाम्नः प्रभावेन स्वयंभूः सृजते जगत् ॥ विभर्ति सकलं विष्णुः शिवः संहरते पुनः ॥४३॥ पाद्मे ॥ गंगा गोदावरी रेवा सद्यो मुक्तिप्रदास्तु याः ॥ निवसंतीह तीर्थानि शालिग्राम-

शिलाजले ॥४४॥ सामवेदे कल्प वल्लीशाखायां यस्यांशेनैव ब्रह्मा विष्णु महेश्वराः अपियाता महा विष्णुर्यस्य दिव्य गुणाश्च सएव कार्य्यकारणात् परः परम पुरुषो रामो दाशरथिर्बभूव ॥४५॥ यजुर्वेदे श्रुतिः ॥ द्वौ सुपर्णौ सजुजौ सखायौ समानं वृक्षं परिसिश्रियाते तयोरन्यः अत्ति पिप्पिलानम् मनस्नं नन्योऽभिचाकसीति इति ॥ श्री सम्प्रदाय भास्कर संग्रहीत श्री राम रंगीले शरणेन कृतं सम्वत् १९७४ ज्येष्ठ कृष्ण द्वितीयायाम् समाप्तिमगमत्—

॥ सोरठा ॥

पढ़ो भूमिका जोड़, सम्प्रदाय को भास्कर।
है यह निगम निचोड़, चारौ फल पावो सुजन ॥